२शालुके च न० मेदि० । ३शालिसम्बन्धिनि त्रि० । "शार्वरस्य तमसो निषिद्धये" किरा० भवार्थे तु कालाट्-ठञ्" शार्वरिक इत्येव रात्रिभवे । [शब्दचि० ।

**शाल** कथने भ्वा०आत्म०सक० सेट् चङि न ह्रस्वः । शालते

**शाल** पु० शल-घञ् । १मत्स्यभेदे २प्राकारे स्वनामख्याते ३वृक्षभेदे अमरः । ४वृक्षमात्रे राजनि० दन्त्यादिस्तु वृक्षमात्रे "रसालः सालः समदृश्यतामुना" इति नैषधम् । ५नदभेदे शब्दच० । ६शालिवाहननृपे विश्वः ।

**शालग्राम** पु० शालानां वृक्षाणां ग्रामः समूहो यत्र । १पर्वतभेदे तत्र जातः अण् । तत्र जाते २विष्णोर्मूर्त्तिभेदे गण्डकशब्दे २५११ पृ० दर्शिते गण्डक्या एकदेशस्य सभेदजाते ३विष्ण्वादिदेवचक्रयुक्तशिलाभेदे च तदुत्पत्ति-लक्षणभेदेन तन्नामभेदाश्च यथा "कीटयोनिं प्रपद्येथा" इति गण्डक्याः सुरान् प्रतिशापे "तेन कर्मविपाकेन जडा कृष्णा नदी भवेति" देवानां गण्डकीं प्रति शापे च जाते विष्णुना तत्समाधानायोक्तं यथा

"शृणु ब्रह्मन्! महादेव! शृणु देव! गजानन! । मद्गणौ ब्राह्मणौ ग्राहमातङ्गौ शापतोऽत्र वै । भविष्यतस्तयोर्मोक्षं भविष्यामि कलेवरम् । शैलं भविष्यति यदा तन्मे रोमजसंभवाः पाषाणान्तर्गताः कीटा वज्रास्याः प्रभविष्यथ" इति "अद्यैव गण्डकी पुण्या गङ्गातुल्या महानदी । गण्डक्यां गिरिराजस्य दक्षिणे दशयोजनम् । विस्तीर्णं तन्महाक्षेत्रं पुण्य-क्षेत्रं महीतले । चक्रतीर्थमिति ख्यातं त्रिषु लोकेषु विश्रुतम् । शालग्रामगता देवा देवो द्वारावतीं गतः । उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः । सर्वदेवप्रीतिकरा भुक्तिमुक्तिप्रदायिनः । भवन्त्वस्यां तु पाषाणा-स्तेतदन्तर्गता सुराः । प्रार्थितं स्वं विना सर्वे वज्रकीटा भवन्त्विति । अनेनैव तु गण्डक्याः पुत्रत्वं भवतामपि । भविष्यति तदन्तश्च चिह्नं तद्दैवतोद्भवम् । विज्ञाय येऽर्चयिष्यन्ति प्रीयतां सा च देवता" इति विष्णूक्तौ ब्रह्मणा तल्लक्षणस्य प्रश्ने विष्णूक्तिर्यथा

"स्वीयवर्णा शिला पूज्या ब्राह्मणाद्यैः सुखाप्तये । स्निग्धा शिला मन्त्रसिद्धिं कृष्णाऽसिद्धिं करोति च । मेचका कीर्त्तिदा धौताङ्गारवत् सा यशोहरा । पाण्डुरूपार्थ-शमनी मलिना पापशोकरी । पीता पुत्रफलं दद्या-दारवर्णा सुतान् हरेत् । नीला संदिशते लक्ष्मीं धूम्राभा हरते मतिम् । रोगप्रदा रक्तवर्णा सिन्दूराभा महा-कलिम् । दारिद्र्यकारिणी वक्रा समा सर्वार्थसाधिका । स्थूला निहन्ति चैवायुः सूक्ष्मा स्वल्पमतिं हरेत् । पूजाफलं लाञ्छितया निष्फला लाञ्छनं विना । क-पिला चित्तवैकल्यं नेत्ररोगश्च कर्बुरा । भग्ना भङ्गकरी-ज्ञेया बहुचक्रापमानदा । लक्षणान्तरहीना च देवचक्रा वियोगदा । बृहन्मुखी कलत्रघ्नी बृहच्चक्रा सुतान् हरेत् । संलग्नचक्रा त्वसुखं बद्धचक्रा महागदम् । भग्न-चक्रा तु दारिद्र्यं सर्वनाशं त्वधोमुखी । कुष्ठादिकं व्यालमुखी विषमा विविधापदः । विकृतावर्त्तनाभिश्च विकारान् कुरुते बहून् । वंशच्छेदो गृहस्थानां नार-सिंह्यां प्रजायते । रेखार्त्ती दुःखदात्री च यथा सूक्ष्मा तथा सुखम् । यथा स्निग्धा तथा लक्ष्मीस्तद्विभेदानतः शृणु । लक्ष्मीहरिः१ स विज्ञेयो यत्र पद्मं सचक्रकम् । लेखा वनमाला च गृहस्थानामभीष्टदा । वासुदेवः२ स विज्ञेयो यद्द्वारे चक्रयुग्मकम् । निरन्तरं समं चापि स श्वेतः पापनाशनः । सङ्कर्षणः३ स विज्ञेयः प्राक्-पश्चाच्चक्रयुग्मकम् । संलग्नपूर्वभागस्थं महारत्नं सुशो-भनम् । प्रद्युम्नः४ सूक्ष्मचक्रं स्याच्छिद्रं दीर्घं सुवि-स्तरम् । सुषिरान्तर्बहिश्छिद्रः पीत इष्टप्रदायकः । अनिरुद्धस्तु५ नीलाभो वर्त्तुलश्चातिशोभनः । रेखाद्वयं तु तद्द्वारि पृष्ठं पद्मेन लाञ्छितम् । केशवः६ स तु विज्ञेयस्त्वेकं वा द्वयमेव वा । प्राग्वा पश्चाच्च चक्रं स्यात् चतुष्कोणः स भाग्यकृत् । नारायणः७ श्यामवर्णो नाभौ चक्रं तथोन्नतम् । दीर्घरेखासमायुक्तं दक्षिणे सुषिरं पृथु । हरिकृपाद शिला वा स्यात् यथा ऊर्द्ध्वं सुखं भवेत् । हरिवद् दृश्यते द्वारं भुक्तिमुक्तिप्रदा तु सा । परमेष्ठी९ स विज्ञेयः पद्मचक्रान्वितस्तु यः । बि-ल्वाकृतिश्च शुक्लाभः पृष्ठे च सुषिरं महत् । विष्णुस्तु१० कृष्णवर्णः स्यात् स्थूलचक्रे सुशोभने । द्वारोपरि तथा रेखा दृश्यते मध्यदेशतः । नारसिंहस्तु११ कपिलः पृथुचक्रो बृहन्मुखः । त्रयो वा पञ्च वा यत्र बिन्दवो गृहिणां न सन् । कपिलनारसिंहस्तु१२ गुडलाक्षा-लिभो भवेत् । स्थूलचक्रद्वयं मध्ये द्वारे रेखा सुशोभना । महान्दसिंहो१३ विज्ञेयः पूर्वोक्तैर्लक्षणैर्युतः । रेखाश्च केशराकारा मुखं दीर्घं भयानकम् । लक्ष्मीन्दसिंहो१४ विज्ञेयश्चतुश्चक्रः सबिन्दुकः । पूर्वोक्तलक्षणैर्युक्तो वन-मालाविभूषितः । वराहोऽसौ१५ शक्तिलिङ्गे चक्रे च विषमे तथा । इन्द्रनीलनिभः स्थूलस्त्रिरेखाला-